॥ ॐ नमो भगवते वासुदेवाय ॥

श्रीमद् भागवत रसिक कुटुंब

मधुराष्टकम्

श्रीमद् भागवत का यह सार
भगवद् भक्ति ही आधार

मधुराष्टकम्

अधरं(म्) मधुरं(म्) वदनं(म्) मधुरं(न्),
नयनं(म्) मधुरं(म्) हसितं(म्) मधुरं(म्) ।
हृदयं(म्) मधुरं गमनं(म्) मधुरं(म्),
मधुराधिपते रखिलं(म्) मधुरं(म्) ॥1॥

वचनं(म्) मधुरं(ञ्) चरितं(म्) मधुरं(म्),
वसनं(म्) मधुरं(म्) वलितं(म्) मधुरं(म्) ।
चलितं(म्) मधुरं(म्) भ्रमितं(म्) मधुरं(म्),
मधुराधिपते रखिलं(म्) मधुरं(म्) ॥2॥

वेणुर्मधुरो रेणुर्मधुरः(फ्),
पाणिर्मधुरः(फ्) पादौ मधुरौ ।
नृत्यं(म्) मधुरं(म्) सख्यं(म्) मधुरं(म्),
मधुराधिपते रखिलं(म्) मधुरं(म्) ॥3॥

गीतं(म्) मधुरं(म्) पीतं(म्) मधुरं(म्),
भुक्तं(म्) मधुरं(म्) सुप्तं(म्) मधुरं(म्) ।
रूपं(म्) मधुरं(न्) तिलकं(म्) मधुरं(म्),
मधुराधिपते रखिलं(म्) मधुरं(म्) ॥4॥

करणं(म्) मधुरं(न्) तरणं(म्) मधुरं(म्),
हरणं(म्) मधुरं(म्) रमणं(म्) मधुरं(म्) ।
वमितं(म्) मधुरं(म्) शमितं(म्) मधुरं(म्),
मधुराधिपते रखिलं(म्) मधुरं(म्) ॥5॥

गुञ्जा मधुरा माला मधुरा,
यमुना मधुरा वीची मधुरा ।
सलिलं(म्) मधुरं(म्) कमलं(म्) मधुरं(म्),
मधुराधिपते रखिलं(म्) मधुरं(म्) ॥6॥

गोपी मधुरा लीला मधुरा,
युक्तं(म्) मधुरं(म्) मुक्तं(म्) मधुरं(म्)।
दृष्टं(म्) मधुरं(म्) सृष्टं(म्) मधुरं(म्),
मधुराधिपते रखिलं(म्) मधुरं(म्) ॥7॥

गोपा मधुरा गावो मधुरा,
यष्टिर्मधुरा सृष्टिर्मधुरा ।
दलितं(म्) मधुरं(म्) फलितं(म्) मधुरं(म्),
मधुराधिपते रखिलं(म्) मधुरं(म्) ॥8॥

॥ श्रीवल्लभाचार्य कृत ॥